स्नेहार्थं शून्यशिरसां ग्रीवास्कन्धोरसां तथा ।
बलार्थं दीयते स्नेहो नस्यशब्दोऽत्र वर्त्तते ।
नस्यस्य स्नैहिकस्यात्र देयास्त्वष्टौ तु विन्दवः ॥
प्रत्येकशो नस्तकयोर्नृणामिति विनिश्चयः ॥"
इति वैद्यकपरिभाषा ॥
"शुक्तिश्च पाणिशुक्तिश्च मात्रास्तिस्रः प्रकीर्त्तिताः ।
द्वात्रिंशद्विन्दवश्चात्र शुक्तिरित्यभिधीयते ॥
द्विशुक्ती पाणिशुक्तिश्च देयास्तु कुशलैर्नरैः ।
तैलं कफे च वाते च केवले पवने वसाम् ॥
दद्यान्नस्यं सदा पित्ते सर्पिर्मज्ज्ञां समारुते ।
ध्मापनं रेचनं चूर्णं युञ्ज्यात्तं सुखवायुना ॥
षड़ङ्गुलद्विमुखया नाड्या भेषजगर्भया ।
स हि भूरितरं दोषं चूर्णत्वादपकर्षति ॥
शिरोविरेचनद्रव्यैः स्नेहैर्वा तैः प्रसाधितैः ।
शिरोविरेचनं दद्यात् रोगेष्वेतेषु बुद्धिमान् ॥
गौरवे शिरसः शूले जाड्ये स्यन्दे गलामये ।
शोथगण्डक्रिमिग्रन्थिकुष्ठापस्मारपीनसे ॥
तोयमद्यगरस्नेहपीतानां पातुमिच्छताम् ।
भुक्तभक्तशिरःस्नातस्नातुकामस्रुतासृजाम् ॥
नवपीनसरोगार्त्तसूतिकाश्वासकासिनाम् ।
शुद्धानां दत्तवस्तीनां तथा नार्त्तवदुर्द्दिने ॥
अन्यत्रात्ययिके व्याधौ नैषां नस्यं प्रयोजयेत् ।
न नस्यं न्यूनसप्ताब्दे नातीताशीतिवत्सरे ।
न चोनद्वादशे धूमः कवड़ो नोनपञ्चमे ॥
न शुद्धिर्न्यूनदशमे न चातिक्रान्तसप्ततौ ।
आजन्ममरणं शस्तं प्रतिमर्षस्तु वस्तिवत् ॥"
इति सारकौमुदी ॥

नस्ता, स्त्री, (नस + टाप् ।) नासाकृतं छिद्रम् । इति नस्तितशब्दटीकायां भरतः ॥
"नस्तामेदनदाहाभ्यां कर्णदाहादिभेदनैः ।
अतिदाहातिवाहाभ्यां वधे चान्द्रायणञ्चरेत् ॥"
इति स्मृतिः ॥

नस्तितः, पुं, (नस्ता नासाच्छिद्रं जाता अस्य । तारकादित्वादितच् ।) नासानिहितरज्जुवलीवर्द्दादि । नाकफोँड़ा वलद इति भाषा । तत्पर्य्यायः । नस्योतः २ । इत्यमरः ।२।९।६३॥

नस्योतः, पुं, (वे ञ तन्तुसन्ताने + भावे क्तः । नस्ति नासिकायां ऊतं वयनं यस्य ।) नस्तितः । इत्यमरटीकायां रमानाथः ॥

नस्यं, क्ली, (नासिकायै हितम् । नासिका + यत् । नसादेशश्च ।) नासिकादेयचूर्णादि । तत्पर्य्यायः । नस्तम् २ नावनम् ३ । इति रत्नमाला ॥ यथा, वैद्यकपरिभाषायाम् ।
"वमनं रेचनं नस्यं निरूहश्चानुवासनम् ।
ज्ञेयं पञ्चविधं कर्म्म मात्रा तस्य प्रवक्ष्यते ॥"
नासाहारा देयौषधविशेषः । यथा,—
"प्रस्थे द्वे गन्धमालानां क्राथयेद्द्रोणमम्भसाम् ।
चतुर्भागावशेषेण तैलप्रस्थं विपाचयेत् ॥
काञ्जिकस्याढ़कं दत्त्वा पिष्टान्येतानि दापयेत् ।
पुनर्नवा गोक्षुरकं सैन्धवं चुषकं वचा ॥
सरलं सुरदारुञ्च वृहती कण्टकारिका ।
नस्यपानाहरत्येव कर्णशूलं हनुग्रहम् ॥"
इति गारुड़े १९८ अध्यायः ॥
अपि च ।
"सिद्धार्थकवचाहिङ्गुकरञ्जं देवदारु च ।
मञ्जिष्ठा त्रिफला श्वेता शिरीषो रजनीद्वयम् ॥
प्रियङ्गुनिम्बत्रिकटु गोमूत्रेणावघर्षितम् ।
नस्यमालेपनञ्चैव स्नानमुद्वर्त्तनं तथा ॥
अपस्मारविषोन्मादशोषालक्ष्मीज्वरापहम् ।
भूतेभ्यश्च भयं हन्ति राजदारे च शासनम् ॥"
इति गारुड़े १९९ अध्यायः ॥
(यथा च ।
"नस्यन्तत् कथ्यते धीरैर्नासाग्राह्यं तदौषधम् ।
नावनं नस्यकर्म्मेति तस्य नामद्वयं मतम् ॥
नस्यभेदो द्विधा प्रोक्तो रेचनं स्नेहनन्तथा ।
रेचनं कर्षणं प्रोक्तं स्नेहनं वृंहणं मतम् ॥
कफपित्तानिलध्वंसे पूर्व्वमध्यापराह्णके ।
दिनस्य गृह्यते नस्यं रात्रौ वाप्युत्कटे गदे ॥
नस्यं त्यजेद्भोजनान्ते दुर्द्दिने चापि तर्पणे ।
तथा नवप्रतिश्यायी गर्भिणी गरदूषितः ॥
अजीर्णी दत्तवस्तिश्च पीतस्नेहोदकासवः ।
क्रुद्धः शोकाभिभूतश्च तृषार्त्तो वृद्धबालकौ ॥
वेगावरोधी तापी च स्नातुकामश्च वर्ज्जयेत् ।
अष्टवर्षस्य बालस्य नस्यकर्म्म समाचरेत् ॥
अशीतिवर्षादूर्द्ध्वञ्च नावनं नैव दीयते ।
अथ वैरेचनं नस्यं ग्राह्यं तैलैः सुतीक्ष्णकैः ॥
तीक्ष्णभेषजसिद्धैर्वा स्नेहैः क्वाथैः रसैस्तथा ।
नासिकारन्ध्रयोरष्टौ षट् चत्वारश्च विन्दवः ॥
प्रत्येकं रेचने योज्या मुख्यमध्यान्तमात्रया ।
नस्यकर्म्मणि दातव्यं शाणैकं तीक्ष्णमौषधम् ॥
हिङ्गुः स्याद्यवमात्रस्तु माषैकं सैन्धवं मतम् ।
क्षीरञ्चैवाष्टशाणं स्यात् पानीयञ्च त्रिकार्षिकम् ॥
कार्षिकं मधुरं द्रव्यं नस्यकर्म्मणि योजयेत् ॥
अवपीड़ः प्रधमनं द्वौ भेदावपरौ स्मृतौ ।
शिरो विरेचनस्थाने तौ तु देयौ यथायथम् ॥
कल्कीकृतादौषधाद्यः पीड़ितो निःसृतो रसः ।
सोऽवपीडः समुद्दिष्टस्तीक्ष्णद्रव्यसमुद्भवः ॥
षड़ङ्गुला द्विवक्त्राया नाड़ीचूर्णन्तया धमेत् ।
तीक्ष्णकोलमितं वक्त्रवातैः प्रधमनं हितम् ॥
जत्रूर्द्ध्वजगते रोगे कफजे स्वरसंचये ।
अरोचके प्रतिश्याये शिरःशूले च पीनसे ॥
शोफापस्मारकुष्ठेषु नस्यं वैरेचनं हितम् ।
भीरुस्त्रीकृशबालानां नस्यं स्नेहेन शस्यते ॥
गलरोगे सन्निपाते निद्रायां विषमज्वरे ।
मनोविकारे कृमिषु युज्यते चावपीड़नम् ॥
अत्यन्तोत्कटदोषेषु विसंज्ञेषु च दीयते ।
चूर्णं प्रधमनन्धीरैस्तद्धि तीक्ष्णतरं यतः ॥
नस्यं स्याद्गुड़शुण्ठीभ्यां पिप्पल्या सैन्धवेन च ।
जलपिष्टेन तेनाक्षिकर्णनासाशिरोगदाः ॥
हनुमन्यागलोद्भूता नश्यन्ति भुजपृष्ठजाः ।
मधूकसारकृष्णाभ्यां वचा मरिचसैन्धवैः ॥
नस्योष्णजले पिष्टं दद्यात् संज्ञा प्रबोधनम् ॥
अपस्मारे तथोन्मादे सन्निपातेऽपतन्त्रके ॥"
इति मध्यखण्डे विंशेऽध्याये शार्ङ्गधरेणोक्तम् ॥
"नस्यकर्म्म यथाकालं यो यथोक्तं निषेवते ।
न तस्य चक्षुर्न घ्राणं न श्रोत्रमुपहन्यते ॥
न स्युः श्वेता न कपिलाः केशाः श्मश्रूणि वा पुनः ।
न च केशाः प्रलुच्यन्ते वर्द्धन्ते च विशेषतः ।
मन्यास्तम्भः शिरःशूलमर्द्दितं हनुसंग्रहः ॥
पीनसार्द्धावभेदौ च शिरःकम्पश्च शाम्यति ।
सिराः शिरःकपालानां सन्धयः स्नायुकण्डराः ॥
नावनप्रीणिताश्चास्य लभन्तेऽभ्यधिकं बलम् ॥
मुखं प्रसन्नोपचितं स्वरः स्निग्धः स्थिरो महान् ।
सर्व्वेन्द्रियाणां वैमल्यं बलं भवति चाधिकम् ॥
न चास्य रोगाः सहसा प्रभवन्त्यूर्द्ध्वजत्रुजाः ।
जीर्य्यतश्चोत्तमाङ्गे च जरा न लभते बलम् ॥"
इति चरके सूत्रस्थाने पञ्चमेऽध्याये ॥
"औषधमौषधसिद्धो वा स्नेहो वा नासिकाभ्यां दीयत इति नस्यं तद्द्विविधं शिरोविरेचनं स्नेहनञ्च । तद्द्विविधमपि पञ्चधा । तद्यथा । नस्यं शिरोविरेचनं प्रतिमर्षोऽवपीड़ः प्रधमनञ्च । तेषु नस्यं प्रधानं शिरोविरेचनञ्च नस्यविकल्पः प्रतिमर्षः शिरोविरेचनविकल्पोऽवपीड़ः प्रधमनञ्च । ततो नस्यशब्दः पञ्चधा निपातितः । तत्र यः स्नेहनार्थं शून्यशिरसां ग्रीवास्कन्धोरसां बलजननार्थं दृष्टिप्रसादजननार्थं वा स्नेहो विधीयते तस्मिन् वैशेषिको नस्यशब्दः । तत्तु नस्यं देयं वाताभिभूते शिरसि दन्तकेशश्मश्रुप्रपातदारुणकर्णशूलकर्णक्ष्वेड़तिमिरस्वरोपघातनासारोगास्यशोषापबाहुकाकालजवलीपलितप्रादुर्भावदारुणप्रबोधेषु वातपैत्तिकेषु मुखरोगेष्वन्येषु च वातपित्तहरद्रव्यसिद्धेन स्नेहेनेति ॥"
"तत्रैतद्द्विविधमभुक्तवतोऽन्नकाले पूर्व्वाह्णे श्लेष्मरोगिणां मध्याह्ने पित्तरोगिणामपराह्णे वातरोगिणाम् ॥"
इति सुश्रुते चिकित्सितस्थाने ४० अध्याये ॥)
नासाया हिते तत्सम्बन्धिनि च, त्रि । प्रयस्ते, पुं । इति संक्षिप्तसारव्याकरणम् ॥

नस्या, स्त्री, (नासिकायै हिता । नासिका + "शरीरावयवात् यत् ।" ५ । १ । ६ । इति यत् ततो नसादेशः ।) नासिका । यथा,—
"घ्राणं गन्धवहा नासा नसा नस्या च नासिका ॥"
इति भरतधृतसाहसाङ्कः ॥
(नासाकृतच्छिद्रम् । इति कश्चित् ।)

नस्योतः, पुं, (नस्यया नासारज्ज्वा ऊतः ।) नस्तितः । इत्यमरः । २ । ९ । ६३ ॥ (यथा, महाभारते । ३ । ३० । २६ ।
"मणिः सूत्र इव प्रोतो नस्योत इव गोवृषः ॥")

नहि, व्य, निषेधः । (यथा,—
"इयं सन्ध्या दूरादुपगतो हन्त मलयात्
तदेकां त्वद्गेहे विनयवति ! नेष्यामि रजनीम् ।
समीरेणोक्तैवं नवकुसुमिता चूतलतिका
धुनाना मूर्द्धानं नहि नहि नहीत्येव कुरुते ॥"
इत्युद्भटः ॥)